# <u>दरिद्रदुर्दैवम्</u>

## दरिद्रदुर्दैवम् प्रहसनस्य कथावस्तु संक्षेपतः वर्ण्यताम् ।

**उ.** दरिद्रदुर्दैवम् इति प्रहसनस्य नायको भिक्षामात्रजीवी वक्रेश्वरशर्माख्यिः जात्या व्राक्ष्मणः। कदाचित् भिक्षार्थं वहिर्गतस्य तस्य गृहागमनं प्रतीक्षमाणाः तत्स्त्रीपुत्राः क्षुत्पीड़िताः अधीराः भूत्वा गृहाद् वहिरागताः। वक्रेश्वरस्तु प्रागेव स्वोदर-पूरणाय स्वकच्छ-वस्त्रेण कांश्चन तण्डूलान् वद्धा रक्षितवान्। ततः अल्पपरिमाणं तण्डूलं दृष्ट्वा तस्य स्त्री मन्दोदरी क्षुभिता अभवत्। तस्याः क्षोभेन वक्रेश्वरः तस्यै तथा कुपितः यथा पुत्रद्वयभारं तदुपरि निक्षिप्य प्रस्थातुमुद्यतः अभवत्। तद्भार्यापि तं रोद्धुं तस्य कच्छवद्ध तण्डुल-प्रकाशो जातः। प्रहसनस्य प्रथम-मुख-सन्धि-वर्णितविषयस्य एष संक्षेपः।

ततः पर्याप्त-भिक्षाहरणाय स्त्रीपुत्रसहितो वक्रेश्वरः वहिर्गतवान्। भिक्षार्थमटन् निदाघ-मध्याह्ने प्रान्तरे पतितास्ते अतीव तृष्णाभिभूताः कश्मिंश्चिद् वृक्षतले शयाना निद्रावशाः वभूवुः। मन्दोदरी तु जाग्रता एव स्थिता। इतोमध्ये क्षुद्ररामनामा कश्चिद् धनी वणिक् तत्पथेन यदा गच्छन्ति स्म तदा मन्दोदरी पतिपुत्रान् जागरयित्वा तैः सह तं परिवृत्य भिक्षाम् अयाचत। स तु कृपणो वणिक् छलेन भिक्षाम् अदत्वा प्रस्थितः। वक्रेश्वरः तं शशाप। अतःपरं तत्पुत्रौ लम्वोदर-षड़ाननौ वलवत्या पिपासया मूर्च्छितप्रायौ सञ्जातौ। तान् तथा दृष्ट्वा कौचित् सिद्धदम्पती शिवानुग्रहप्राप्त-पाशक-त्रय-क्षेपण-सञ्जात-जलेन तौ

उज्जीवितवन्तौ। कृपा-परवशौ तौ सिद्धौ यथासङ्कल्पं सर्वद्रव्योत्पादकं तत्पाशकत्रयं वक्रेश्वराय दत्तवन्तौ। पाशकत्रयस्य अपरं वैशिष्ट्यमपि आसीत्। तदुत्पादितं द्रव्यं न केवलं स्वेनैव लभ्यं परन्तु प्रतिवेशिभिरपि सर्वैः। किन्तु प्रतिवेशि-दारिद्र्यं सङ्कल्प्य यावत् पाशकक्षेपणाय प्रवृत्तः तावत् सिद्धः सहसागत्य पाशकान् आच्छिद्य गृहीतवान्। ततः खलता-विहीनं नरचित्तं स्यादित्याशां प्रकाश्य भरतवाक्येन प्रहसनं समाप्तम्।